वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (३१)

१८.०४.२०११

पुनरावर्तनम्

- ऊकारान्ताः पुँल्लिङ्गाः
  - न धातुः, न नदीत्वम् – 'इको यणचि', अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः ।
  - उदा – हूहू, दृभू
  - न धातुः, नदीसंज्ञा – 'इको यणचि', अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः । 'अम्बार्थनद्योर्ह्रस्वः', 'आण्नद्याः', 'ह्रस्वनद्यापो नुट्', 'ङेराम्नद्याम्नीभ्यः' ।
  - उदा – अतिचमू
  - धातुः, असंयोगपूर्व-उवर्णान्तः, अनेकाजङ्गम्, गति-कारकपूर्वपदम् – 'ओः सुपि'
  - उदा – खलपू, सुलू, उल्लू
  - धातुः, संयोगपूर्व-उकारान्तः, एकाजङ्गम्, गति-कारकेतरपूर्वपदम् – 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'
  - उदा – कटप्रू, लू, परमलू

पुनरावर्तनम्

- भूशब्दान्तं प्रातिपदिकम् – 'न भूसुधियोः' इति यण्-निषेधः । उवङ् ।
- उदा – स्वभू, स्वयम्भू
- वर्षाभू – 'वर्षाभ्वश्च' इति यण् ।
- दृन्भू, करभू, पुनर्भू – 'दृन्करपुनःपूर्वस्य भुवो यण् वाच्यः' (वा) इति यण् ।

- गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
- न गुरोः परमं शिशुरस्मि गुरोर्मतिरस्ति गुरौ मम पाहि गुरो ॥

ऋकारान्ताः पुँल्लिङ्गाः

- ऋकारान्तः पुँल्लिङ्गः धातृ-शब्दः
- ‘डुधाञ् धारणपोषणयोः’ (जु.उ.अनि) – कर्तरि तृच् प्रत्ययः ।
- धातृ (‘कृत्तद्धितसमासाश्च’ – १.२.४६ – इति प्रातिपदिकसंज्ञा)
- धातृ (सुँ) स् (‘स्वौजस्...’ – ४.१.२ – इति सुप्रत्ययः)
- धातन् स् (‘ऋदुशनस्पुरुदंसोऽनेहसां च’ – ७.१.९४ – इत्यनङ्)
- धातान् स् (‘अप्-तृन्-तृच्....’ – ६.४.११ – इति उपधादीर्घः)
- धातान् (‘हल्ङ्याब्भ्यो दीर्घात्...’ – ६.१.६८ – इति सुलोपः)
- धाता (‘नलोपः प्रातिपदिकान्तस्य’ – ८.२.७ – इति नलोपः)

- हे धातृ स्
- हे धातर् स् ('ऋतो ङिसर्वनामस्थानयोः' – ७.३.११० – इति गुणः)
- हे धातर् ('हल्ङ्याब्भ्यो....' – ६.१.६८ – इति सुलोपः)
- **हे धातः** ('खरवसानयोर्विसर्जनीयः' – ८.३.१५)

- धातृ औ
- धातर् औ ('ऋतो ङिसर्वनामस्थानयोः' – ७.३.११० – इति गुणः)
- धातार् औ ('अप्-तृन्-तृच्...' – ६.४.११ – इति उपधादीर्घः)
- **धातारौ**

- धातृ (शस्) अस्
- धातॄस् (‘प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२)
- धातॄन् (‘तस्माच्छसो नः पुंसि’ – ६.१.१०२)

- धातृ (टा) आ
- धात्रा (‘इको यणचि’ – ६.१.७७)

- धातृभ्याम्

- धातृ (ङे) ए
- धात्रे (‘इको यणचि’ – ६.१.७७)

- धातृ (ङसि)अस्
- धात् ऋ अ स्
- धात् उर् स् (‘ऋत उत्’ – ६.१.१११, ‘उरण् रपरः’ – १.१.५१)
- धातुर् (‘रात्सस्य’ – ८.२.२४ – इति सकारलोपः)
- धातुः (‘खरवसानयोर्विसर्जनीयः’ – ८.३.१५)

- धातृ आम्
- धातृ न् आम् (‘ह्रस्वनद्यापो नुट्’ – ७.१.५४)
- धातृ नाम् (‘नामि’ – ६.४.३ – इति दीर्घः)
- धातॄणाम् (‘ऋवर्णान्नस्य णत्वं वाच्यम्’ (वा) इति णत्वम्)

- धातृ (ङि) इ
- धातर् इ (‘ऋतो ङिसर्वनामस्थानयोः’ – ७.३.११० – इति गुणः)
- धातरि

- एवं नप्त्रादयः

ऋकारान्तः पुँल्लिङ्गः धातृशब्दः

असम्बुद्धौ सर्वनामस्थाने परे 'अप्तृन्तृच्...' इति उपधादीर्घः

सर्वनामस्थानेषु ङौ च 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः

ङसिङसोः 'ऋत उत्'

		द्विवचनम्	
प्रथमाविभक्तिः	धाता	धातारौ	धातारः
सम्बोधनप्रथमाविभक्तिः	हे धातः	हे धातारौ	हे धातारः
द्वितीयाविभक्तिः	धातारम्	धातारौ	धातॄन्
तृतीयाविभक्तिः	धात्रा	धातृभ्याम्	धातृभिः
	धात्रे	धातृभ्याम्	धातृभ्यः
	धातुः	धातृभ्याम्	धातृभ्यः
	धातुः	धात्रोः	धातॄणाम्
सप्तमीविभक्तिः	धातरि	धात्रोः	धातृषु

- उद्गातारः
- ‘अप्तृन्...’ इति सूत्रे अपरिगणितेऽपि भाष्यप्रयोगबलात् उपधादीर्घः ।
- पिता
- ‘सर्वनामस्थाने चासम्बुद्धौ’ (६.४.८) इति दीर्घः
- व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वात् न दीर्घः
- पितरौ, पितरः
- पितरम्, पितरौ
- शेषं धातृवत् ।
- एवं जामातृभ्रात्रादयः ।

ऋकारान्तः पुँल्लि

सर्वनामस्थानेषु ‘ऋतो ङिसर्वनामस्थानयोः’ इति गुणः । उपधादीर्घस्तु न ।

सौ ‘ऋदुशनस्..’ इति अनङ् । ‘सर्वनामस्थाने चासम्बुद्धौ’ इति उपधादीर्घः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथ	पिता	पितरौ	पितरः
सम्बोधन	हे पितः	हे पितरौ	हे पितरः
द्विती	पितरम्	पितरौ	पितॄन्
तृती	पित्रा	पितृभ्याम्	पितृभिः
चतुर्थीविभक्तिः	पित्रे	पितृभ्याम्	पितृभ्यः
पञ्चमीविभक्तिः	पितुः	पितृभ्याम्	पितृभ्यः
षष्ठीविभक्तिः	पितुः	पित्रोः	पितॄणाम्
सप्तमीविभक्तिः	पितरि	पित्रोः	पितृषु

- ऋकारान्तः पुँल्लिङ्गः नृ-शब्दः
- ना, नरौ, नरः ।
- हे नः ।

२८३. नृ च (६.४.६)

- पदद्वयम् ।
- ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ (६.३.१११) इत्यतः ‘दीर्घः’ इति, ‘नामि’ (६.४.३) इति, ‘छन्दस्युभयथा’ (६.४.५) इत्यतः ‘उभयथा’ इति च अनुवर्तते ।
- ‘नृ’ इत्येतस्य नामि वा दीर्घः स्यात् ।
- नृणाम्, नॄणाम्

ऋकारान्तः पुँ

सर्वनामस्थानेषु 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः ।
उपधादीर्घस्तु न ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	ना	नरौ	नरः
सम्बोधनप्रथमाविभक्तिः	हे नः	हे नरौ	हे नरः
द्वितीयाविभक्तिः	नरम्	नरौ	नॄन्
तृतीयाविभक्तिः	न्रा	नृभ्याम्	नृभिः
चतुर्थीविभक्तिः	न्रे	नृभ्याम्	नृभ्यः
पञ्चमीविभक्तिः	नुः	नृभ्याम्	नृभ्यः
षष्ठीविभक्तिः	नुः	न्रोः	नृणाम्/नॄणाम्
सप्तमीविभक्तिः	नरि	न्रोः	[illegible]

नामि परे 'नृ च' इति वैकल्पिकः उपधादीर्घः

ॠकारान्ताः पुँल्लिङ्गाः

- ‘कॄ’ ‘तॄ’ अनयोरनुकरणे ‘प्रकृतिवदनुकरणम्’ (प) इति वैकल्पिकातिदेशाद् इत्त्वे रपरत्वे कीः, किरौ, किरः । गीः, गिरौ, गिरः इत्यादि गीर्वत् ।
- ‘कॄ विक्षेपे’ ‘तॄ प्लवनतरणयोः’ इत्येतयोः धात्वोः अनुकरणम् ।
- ‘प्रकृतिवदनुकरणं भवति’ इति परिभाषा पाक्षिकी ।
- अतिदेशपक्षे धातुत्वमादाय ‘ॠत इद्धातोः’ (७.१.१००) इति इकारादेशः, ‘उरण् रपरः’ (१.१.५१)

- कृ   स्
- किर् स्   (‘ॠत इद्धातोः’ – ७.१.१०० – इति इत्त्वम्, ‘उरण् रपरः’ – १.१.५१)
- किर्   (‘हल्ङ्याब्भ्यो…’ – ६.१.६८ – इति सुलोपः)
- कीर्   (‘र्वोरुपधाया दीर्घ इकः’ – ८.२.७६ – इति उपधादीर्घः)
- **कीः**   (‘खरवसानयोर्विसर्जनीयः’ – ८.३.१५)

- कृ औ
- **किरौ** (‘ॠत इद्धातोः’ – ७.१.१०० – इति इत्त्वम्, ‘उरण् रपरः’ – १.१.५१)

- कृ भ्याम्
- किर् भ्याम् (‘ऋत इद्धातोः’ – ७.१.१०० – इति इत्त्वम्, ‘उरण् रपरः’ – १.१.५१)
- कीर् भ्याम् (‘हलि च’ – ८.२.७७ – इति दीर्घः)
- कीर्भ्याम्

ऋकारान्तः पुँल्लिङ्गः कॄशब्दः
(प्रकृति

सर्वत्र ‘ऋत इद्धातोः’ इति इत्त्वम्, रपरत्वम्

सुलोपे कृते ‘र्वोरुपधाया दीर्घ इकः’ इति पदान्ते उपधादीर्घः

	कवचनम्	द्विवचनम्	बहुवचनम्
प्रथमावि	कीः	किरौ	किरः
सम्बोधनप्रथ	हे कीः	हे किरौ	हे किरः
द्वितीयावि	किरम्	किरौ	किरः
तृतीयावि	किरा	कीर्भ्याम्	कीर्भिः
चतुर्थीविभक्तिः	किरे	कीर्भ्याम्	कीर्भ्यः
पञ्चमीविभक्तिः	किरः	कीर्भ्याम्	कीर्भ्यः
षष्ठीविभक्तिः	किरः	किरोः	किराम्
सप्तमीविभक्तिः	किरि		कीर्षु

हलादिषु प्रत्ययेषु परेषु ‘हलि च’ इति उपधादीर्घः

- इत्त्वाभावपक्षे तु ‘ऋदुशनस्…’ इति, ‘ऋतो ङि…’ इति च तपरकरणाद् अनङ्-गुणौ न ।
- कृः क्रौ क्रः ।
- कृम् क्रौ कृन् ।
- क्रा, क्रे इत्यादि ।

ॠकारान्तः पुँल्लिङ्गः कॄशब्दः (प्रकृतिवदनुकरणम् इत्यस्य अभावे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	कॄः	क्रौ	क्रः
सम्बोधनप्रथमाविभक्तिः	हे कॄः	हे क्रौ	हे क्रः
द्वितीयाविभक्तिः	कॄम्	क्रौ	कॄन्
तृतीयाविभक्तिः	क्रा	कॄभ्याम्	कॄभिः
चतुर्थीविभक्तिः	क्रे	कॄभ्याम्	कॄभ्यः
पञ्चमीविभक्तिः	क्रः	कॄभ्याम्	कॄभ्यः
षष्ठीविभक्तिः	क्रः	क्रोः	क्राम्
सप्तमीविभक्तिः	क्रि	क्रोः	कॄषु

सर्वत्र अजादिषु प्रत्ययेषु ‘इको यणचि’ इति यणादेशः, अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः